## कर्तृकरणयोस्तृतीया। (१८/५६१)

कर्तरि करणे च कारके तृतीया विभक्तिर्भवति। देवदत्तेन कृतम्। यज्ञदत्तेन [1]भुक्तम्। करणे—दात्रेण लुनाति। परशुना छिनत्ति।

[१२५] तृतीयाविधाने [2]प्रकृत्यादीनामुपसङ्ख्यानम्। (म. भा. १.४५२)

प्रकृत्याऽभिरूपः। प्रकृत्या दर्शनीयः। प्रायेण याज्ञिकः। [3]प्रायेण वैयाकरणः। गार्ग्योऽस्मि गोत्रेण। समेन धावति। [4]विषमेण धावति। द्विद्रोणेन धान्यं क्रीणाति। पञ्चकेन पशून् [5]क्रीणाति। [6]साहस्रेणाश्वान् क्रीणाति (म. भा. १.४५२)॥

## सहयुक्तेऽप्रधाने। (१९/५६४)

सहार्थेन युक्ते अप्रधाने तृतीया विभक्तिर्भवति। पुत्रेण सहागतः पिता[7]। पुत्रेण सह गोमान्। पितुरत्र [8]क्रियादिसम्बन्धः शब्देनोच्यते, पुत्रस्य तु प्रतीयमान [9]इति तस्याप्राधान्यम्। सहार्थेन च योगे तृतीयाविधानात् [10]पर्यायप्रयोगेऽपि भवति, पुत्रेण [11]सार्धम् इति। विनाऽपि सहशब्देन भवति, 'वृद्धो यूना॰' (१.२.६५/९३१) इति [12]निदर्शनात्। अप्रधाने इति किम्? शिष्येण सहोपाध्यायस्य गौः॥

## येनाङ्गविकारः। (२०/५६५)

अङ्गशब्दोऽत्रा[13]ङ्गसमुदाये [14]शरीरे वर्तते, येन इति च तदवयवो हेतुत्वेन निर्दिश्यते। येनाङ्गेन विकृतेनाङ्गिनो विकारो लक्ष्यते, ततस्तृतीया विभक्तिर्भवति[15]। अक्ष्णा काणः। पादेन खञ्जः। पाणिना [16]कुण्ठः। अवयवधर्मेण समुदायो व्यपदिश्यते। अङ्गविकारः इति किम्? [17]अक्षि काणमस्य (म. भा. १.४५३)॥

## इत्थम्भूतलक्षणे। (२१/५६६)

[18]कञ्चित् प्रकारं प्राप्तः इत्थम्भूतः। तस्य लक्षणमित्थम्भूतलक्षणम्। [19]ततस्तृतीया विभक्तिर्भवति[20]। अपि भवान् कमण्डलुना छात्रमद्राक्षीत् (म. भा. १.४५३)? छात्रेणोपाध्यायम्। [21]शिखया परिव्राजकम्। इह न भवति, कमण्डलुपाणिश्छात्रः इति, लक्षणस्य समासेऽन्तर्भूतत्वात्। [22]इत्थम्भूतः इति [23]किम्? वृक्षं प्रति [24]विद्योतनम्॥

---

1. कृतम् ड. इ. ह. 2. प्रकृत्यादिभ्यः ड. इ. ह, प्रकृत्यादिभिः ग. 3. उदाहरणमिदं नास्ति फ. ग. 4. उदाहरणमिदं नास्ति फ. 5. परिक्रीणाति क. 6. उदाहरणमिदं नास्ति फ, क्रीणाति नास्ति ड, सहस्रेण क्रीणाति इ. 7. पुत्रेण सह स्थूलः इत्यधिकम् क. इ. फ, पिता पुत्रेण सह स्थूलः इत्यधिकम् ह. 8. क्रियाभिसम्बन्धः ड. इ. 9. तस्मात् प्राधान्यं क. 10. पर्याययोगे इ. 11. साकम् क. ड. फ. 12. निपातनात् क. ड. इ. फ. 13. अङ्गसमुदायिनि ड. 14. शरीरे नास्ति ह. 15. विकृतिः हानिः इत्यधिकम् अ. 16. कुणिः अ. ग. 17. अक्षिकाणं पश्य क. 18. किंचित्प्रकारं इ. फ. 19. तत्र ड. 20. श्वेतच्छत्रेण राजानमद्राक्षीत् इत्यधिकम् ह. 21. शिखण्डया ह. 22. इत्थंभूतः – विद्योतनम् नास्ति ग. ह. 23. किम् नास्ति फ. 24. विद्योतते विद्युत् क.